**परमानन्द** पु० परमः सर्वोत्कृष्ट आनन्दः। सकलानन्दोत्कृष्टानन्दात्मके परमात्मनि "परमानन्दमाधवम्" श्रीधरः। "एतस्यैव मात्रामुपजीवन्ति" इति श्रुतेः तैत्ति०उ० ब्रह्मानन्दवल्ल्यां ८अनुवाके "सैषानन्दस्य मीमांसा" इत्युपक्रमे मानुषानन्दादिभ्यः प्रजापत्यानन्दान्तेभ्य ब्रह्मणः शतगुणानन्दत्वोक्तेश्च तथात्वम्। आनन्दशब्दे ७१८पृ० तद्वाक्यान्युक्तानि। २तथानन्दयुक्ते परमात्मनि इति नैयायिकाः। तत्रानन्दशब्दस्य दुःखाभावपरत्वम्। इदन्त्वत्र बोध्यम् "स एको ब्रह्मण आनन्द इत्यत्र अभेदे षष्ठी भेदषष्ठीग्रहणे आनन्दशब्दस्य दुःखाभावपरत्वकल्पने च अभावस्य निर्विशेषत्वात् तुल्यत्वात् प्रजापत्यानन्दापेक्षया शतगुणत्वस्यासम्भवात् ब्रह्मण आनन्दे प्रजापतिशतगुणत्वोक्तिर्विरुध्यते।

**परमान्न** न० कर्म०। पायसे दुग्धपक्वेऽन्ने अमरः दैवपितृप्रियत्वात् परमत्वमस्य। कृतान्नशब्दे २१८१५ तत्पाकप्रकारगुणाद्युक्तं दृश्यम्।

**परमापक्रमज्या** स्त्री सू०सि० उक्तायां परमक्रान्तिज्यायां परक्रान्तिशब्दे दृश्यम्।

**परमापूर्व** न० कर्म०। कलिकापूर्वजन्ये स्वर्गादिफलसाधने अपूर्वभेदे कलिकापूर्वशब्दे १८०८ पृ० दृश्यम्।

**परमामुद्रा** स्त्री त्रिपुरायाः पूजाङ्गे मुद्राभेदे "मध्यमे कुटिले कृत्वा तर्जन्युपरि संस्थिते। अनामिके मध्यगते तथैव हि कनिष्ठिके। सर्वा एकत्र संयोज्य अङ्गुष्ठपरिपीड़िताः। एषा तु परमामुद्रा योनिमुद्रेयमीरिता। एतामुद्रा महेशानि। त्रिपुराया मयोदिताः। पूजाकाले प्रयोक्तव्या यथानुक्रमयोगतः" तन्त्रसारः।

**परमायुष** पु० परममायुर्यस्य प्रशो०बा० अच्स०। असनवृक्षे शब्दच०।

**परमायुस्** न० कर्म०। यस्य यावत्कालं जीवनकालः शास्त्रोक्तः तस्य तत्कालपर्य्यन्तजीवनकाले आयुर्दायशब्दे ७७२ पृ० तदानयनाद्युक्तं दृश्यम्। शब्दमालायां प्राणिभेदे परमजीवनकालभेदास्च उक्ता यथा

"शतं वर्षाणि विंशत्या निशाभिः पञ्चभिः सह। परमायुरिदं प्रोक्तं नराणां करिणामिह। अब्दा द्वात्रिंशदश्वानां शुनां द्वादश वत्सराः। पञ्चविंशतिवर्षाणि खरस्य करभस्य च। चतुर्विंशतिरब्दानां वृषस्य महिषस्य च। छागमूकरवस्तादिपशूनां षड्दशान्विताः" अधिकमायुःशब्दे ७८५ पृ० दृश्यम्।

**परमार्थ** पु० कर्म०। १उत्कृष्टवस्तुनि २यथार्थे च माण्डुक्यवार्त्तिकं तत्र अर्थस्य अबाधितत्वात् परमत्वम्।

**परमार्हत** पु०परम अर्हन् उपास्यतया अस्त्यस्य अच्, अर्हन् देवताऽस्य अण् कर्म० वा। जैनराजर्षिभेदे हेमचन्द्रः।

**परमीकरणमुद्रा** स्त्री देवताह्वानाङ्गे मुद्राभेदे "अन्योन्यग्रथिताङ्गुष्ठप्रसारितकराङ्गुली। महामुद्रेयमुदिता परमीकरणे बुधैः। प्रयोजयेदिमा मुद्रा देवताह्वानकर्मणि" तन्त्रसा०। इमाः आवाहन्यादिपरमीकरणान्ता इत्यर्थः। परमीकरणञ्च अस्या मुद्राया देवदर्शनपथे आनयनम्।

**परमृत्यु** पु० परस्मात् मृत्युरस्य। काके त्रिका० तस्य रोगादिना स्वतो मृत्योरभावेन परहेतुकमृत्युत्वात्तथात्वम्।

**परमेश** पु० कर्म०। परमेश्वरे

**परमेश्वर** पु० कर्म०। जगत्सृष्ट्यादिकारके सगुणे त्रिमूर्त्तिके १ब्रह्मणि २चक्रवर्त्तिनि नृपे च। ३शिवे हला० ४विष्णौ च।

**परमेष्ठ** पु० परमे चिदाकाशे सत्यलोके वा तिष्ठति स्था—क अलुक्समा० अम्बाम्बेति षत्वम्। चतुर्मुखे ब्रह्मणि। क्विप्। परमेष्ठा अप्यत्र यजु० १४।३१ तत्र "स्वाम्त्रिन् स्थ्यामिति" षत्वम्।

**परमेष्ठिन्** पु० परमे व्योमनि चिदाकाशे ब्रह्मणि सत्यलोके वा तिष्ठति "परमे कित्" उणा०इनि अलुक्स० "स्थास्थिनुस्थ्यूणाम्" षत्वम्। चतुर्मुखे ब्रह्मणि अमरः २आजमीढ नृपपुत्रभेदे भा०आ०९४अ०। ३जिने पु० हेमच० ४महादेवे भा०व० ३७अ० ५शालग्राममूर्त्तिभेदे "परमेष्ठी च शुक्लस्तु पद्मचक्रसमन्वितः। चित्राकृतिस्तथा पृष्ठे शुषिरं चातिपुष्कलम्" पुराणसमुच्चये। ६गुरुभेदे "मन्त्रदाता गुरुः प्रोक्तो मन्त्रस्तु परमो गुरुः। परात्परो गुरुस्त्वं हि परमेष्ठी गुरुस्त्वहम्" तन्त्रम् परापरेति पाठान्तरम्। ७ब्राह्म्यां (वामनहाटि) स्त्री राजनि० ङीप् तस्येदं यत् टिलोपे। पारमेष्ठ्य तत्सम्बन्धिनि त्रि०।

**परम्परा** स्त्री परम् अतिशयेन पृणाति पिपूर्त्ति वा पृ-पृ—वा अच्। १वंशे २सन्ततौ अविच्छिन्नधारायाम् हेमच० "एवं परम्पराप्राप्तो योगः प्रोक्तोमयाऽनघ!" गीता ३वधे ४अनुक्रमे च ५मृगभेदे मेदि० प्रपौत्रादौ ६अन्वये ७प्रपौत्रसुते पु० शब्दच०।

**परम्पराक** न० परम् अतिशयेन परा श्रेष्ठा परम्परा तया धारया आकोहिंसनं यत्र अक—कुटिलगतौ घञ् प्रशस्ता परम्परा हिंसा अनिष्टाजनकत्वात् कन् वा, नपुंसकत्व